# श्रृङ्गाटकम् (शुष्कबीजम्)

श्रृङ्गाटकांकलोड्यंच गुरु विष्टम्भि शीतलम् ॥117॥
(च. सू., 27)

गर्भस्थापने-श्रृङ्गाटकपुष्करबीजकशेरुकान् भक्षणार्थम् ॥24॥
(च. शा., 8)

मूत्रकृच्छ्रे पिबेत्कषायं कमलोत्पलानाम्।
श्रृङ्गाटकानामथवा विदार्याः ॥49॥
(च. चि. 26)

गर्भस्थापने- श्रृङ्गाटकं बिसं द्राक्षा कशेरु मधुकं सिता ॥62॥
(सु. शा. 10)

गुरु विष्टम्भिशीतौ च श्रृङ्गाटककशेरुकौ ॥303॥
(सु.सू. 46)

श्रृङ्गाटकं कषायं तु मधुरं वृष्यवातलम्।
जीवनं पित्तशमनं कफमेहहरं गुरु ॥1621॥
(कै.नि.ओषधिवर्ग)

श्रृङ्गाटकः शोणितपित्तहारी लघुः सरो वृष्यतमो विशेषात्।
त्रिदोषतापश्रमशोफहारी रुचिप्रदो मेहनदार्ढ्यहेतुः ॥46॥
(रा.नि.मूलकादिवर्ग)

श्रृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम् ।
ग्राही शुक्रानिलश्लेष्मप्रदं दाहास्त्रपित्तनुत् ।।93।।

(भा.प्र. नि. आम्रादिफलवर्ग)

श्रृङ्गाटकश्चातिवृष्यो लघुर्ग्राही रुचिप्रदः ।
शुक्रलो वातकफकृत् गुरुर्मेहनदार्ढ्यकृत् ।।
तुवरो मधुरः शीतस्तर्पणः स्वादुपित्तजित्।
दाहत्रिदोषमेहघ्नो रक्तदोषभ्रमापहः ।।
शोफसन्तापहा प्रोक्तः पूर्ववैद्यैर्महर्षिभिः।

(नि. र.)

# स्रुवावृक्षः (पत्रम्, काण्डत्वक्)

नीपं शताह्वकं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकं चैव दोषघ्नं गरहारि च ।। 145-146।।
(च. सू. 27)

प्रमेहे-श्रृङ्गाटकगिलोड्य- - विकङ्कतेषु वा।
यवागून्नविकारांश्च सेवेत।।10।।
(सु. चि. 11)

लूताविषे-ह्रीबेरवैकंकत- ----------- वराङ्गम्।
पित्तकफानिललूताः पानाञ्जननस्यलेपसेकेन।।82।।
(अ. हृ. उ. 37)

गोपघोटा रसे तिक्ता शीतला शोफनाशनी।
हन्ति श्लेष्माणमत्युग्रमुद्रक्तं हन्ति योगतः ।।38।।
(ध. नि. आम्रादिवर्ग)

स्रुवद्रुर्मधुरस्तिक्तः कषायः शीतलो जयेत्।
बलासपित्तशोफास्त्रं फलं पाकरसोषणम् ।।406।।
तीक्ष्णं पित्तास्त्रकृत् पक्वं स्वादु तिक्तं त्रिदोषजित् ।
(कै. नि. ओषधिवर्ग)

विकङ्कतोऽम्लो मधुरः पाकेऽतिमधुरो लघुः।
दीपनः कामलास्त्रघ्नः पाचनः पित्तनाशनः।।155।।
(रा.नि.प्रभद्रादिवर्ग)

विकङ्कतफलं पक्वं मधुरं सर्वदोषजित् ।।88।।
(भा. नि. आम्रादिफलवर्ग)

# तालमूली (काण्डकन्दः)

मुषली रसपाकाभ्यां स्वादुः शीताग्निवर्द्धनी।
वातपित्तहरा वृष्या स्थैर्यमार्दवदायिनी।।394।।

(सो.नि.2)

मुशली मधुरा गुर्वीतिक्ता वृष्या रसायनी।
वीर्योष्णा बृंहणी हन्ति दुर्नामानि प्रभञ्जनम्।।1606।।

(कै. नि. ओषधिवर्ग)

मुशली मधुरा शीता वृष्या पुष्टिबलप्रदा।
पिच्छिला कफदा पित्तदाहश्रमहरा परा।।116।।
मुशली स्याद्द्विधा प्रोक्ता श्वेता चापरसंज्ञकौ।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी।।117।।

(रा.नि.मूलकादिवर्ग)

मुशली मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजान्यानिलं तथा।।183।।

(भा.प्र.नि.गुडूच्यादिवर्ग)

मुशली मधुरा वृष्या धातुवृध्दिकरी गुरुः।
तिक्ता पुष्टिबलकारी पिच्छिला श्लेष्मला मता।।
रसायनी शीतला च पित्तदाहहरी मता।
रक्तदोषं श्रमञ्चैव नाशयेदिति कीर्तितम्।।
कृष्णाधिकगुणा प्रोक्ता श्वेता चाल्पगुणा मता।

(शा. नि.)

# तालीसम् (शुष्कपत्रम्)

पिप्पलीविडङ्ग ... तालीश ... शिरोविरेचनानि ॥6॥

(सु. सू. 39)

तालीसं श्वासकासघ्नं दीपनं श्लेष्मपित्तजित् ।
मुखरोगहरं हृद्यं सुपत्रं पत्रसंवृतम् ॥54॥

(ध. नि. शतपुष्पादिवर्ग)

तालीसं तिक्तकटुकं कृमिवातकफापहम् ॥1382॥

(कै. नि. ओषधिवर्ग)

तालीसपत्रं तिक्तोष्णं मधुरं कफवातनुत् ।
कासहिक्काक्षयश्वासछर्दिदोषविनाशकृत् ॥184॥

(रा. नि. पिप्पल्यादिवर्ग )

तालीसं लघु तीक्ष्णोष्णं श्वासकासकफानिलान्।
निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान् ॥115॥

(भा. प्र. नि., कर्पूरादिवर्ग)

तालीसपत्रं मधुरं तिक्तं चोष्णं लघु स्मृतम्।
तीक्ष्णं स्वर्यं च हृद्यं च अग्निदीप्तिकरं मतम् ।
श्वासं कासं कफं वातं क्षयगुल्मारुचिस्तथा।
रक्तदोषं वमिं चाममग्निमान्द्यं च नाशयेत्।
मुखरोगं च पित्तं नाशयेदिति कीर्तितम्॥

(नि. र.)

# तिलः (बीजम्)

स्निग्धोष्णो मधुरस्तिक्तः कषायः कटुकस्तिलः।
त्वच्यः केश्यश्च बल्यश्च वातघ्नः कफपित्तकृत् ।।30।।
(च. सू. 27)

नवनीततिलाभ्यासात् .... अर्शांस्यपयान्ति रक्तानि।।210।।
(च. चि. 14)

ईषत्कषायो मधुरः सतिक्तः सांग्राहिकः पित्तकरस्तथोष्णः।
तिलो विपाके मधुरो बलिष्ठः स्निग्धो व्रणे लेपन एव पथ्यः ।।39
दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्योऽनिलहा गुरुश्च।
तिलेषु सर्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथाऽन्ये ।।40।।
(सु. सू. 46)

तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः।
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तकृत्।।110।।
बल्यः केश्यो हिमस्पर्शो त्वच्यः स्तन्यो व्रणे हितः ।
दन्त्योऽल्पमूत्रकृद् ग्राही वातघ्नोऽग्निमतिप्रदः ।।111।।
(ध. नि. सुवर्णादिवर्ग)

स्निग्धो वर्णबलाग्निवृध्दिजननस्तन्यानिलघ्नो गुरु।
सोष्णः पित्तकरोऽल्पमूत्रकरणः केश्योऽतिपथ्यो व्रणे ।।
संग्राही मधुरः(पाठा. कटुकः)कषायसहितस्तिक्तो विपाके कटुः।
कृष्णः पथ्यतमः सितोऽल्पगुणदः क्षीणास्तथाऽन्ये तिलाः ।।193।।
(रा. नि. सुवर्णादिवर्ग)

तिलो रसे कटुस्तिक्तो मधुरस्तुवरोगुरूः।
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत्।
बल्यः केश्यो हिमस्पर्शो त्वच्यः स्तन्यो व्रणे हितः।।64।।
दन्त्योऽल्पमूत्रकृद् ग्राही वातघ्नोऽग्निमतिप्रदः ।
कृष्णः श्रेष्ठतमस्तेषु अन्ये हीनतरः शुक्रलो मध्यमः सितः।।65।।
(भा. प्र. नि. धान्यवर्ग)

# तुलसी (बीजम्)

शटीपुष्कर...सुरसा...जीवन्ती चण्डा इति दशेमानि
श्वासहराणि भवन्ति।।37।।

(च. सू. 4)

सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः।
प्रतिश्यायारुचि श्वासकासघ्नो व्रणशोधनः।।19।।

(सु.सू.38)

हिध्मकासविषश्वासपार्श्वरुक्पूतिगन्धहा।
सुरसः सुमुखो नातिविदाही गरशोफहा।।108।।

(अ. हृ. सू. 6)

तुलसी लघुरुष्णा च रूक्षा कफविनाशिनी।
कृमिदोषं निहन्त्येषा रुचिकृद्वह्निदीपनी।।45।।

(ध. नि. करवीरादिवर्ग)

तुलसी तुवरा तिक्ता तीक्ष्णोष्णा कटुपाकिनी।
रूक्षा हृद्या लघुः कट्वी दाहपित्ताग्निवर्द्धनी।।1554।।
जयेद्वातकफश्वासकासहिद्मावमिकृमीन्।
दौर्गन्ध्यपार्श्वरुक्कुष्ठविषकृच्छ्राश्मदृग्गदान्।।1555।।

(कै. नि. ओषधिवर्ग)

तुलसी कटुतिक्तोष्ण सुरभिः श्लेष्मवातजित्।
जन्तुभूतक्रिमिहरा रुचिकृद्वातशान्तिकृत्।।79।।

(रा. नि. करवीरादिवर्ग)

तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्।।62।।
दीपनी कुष्ठकृच्छ्रास्त्रपार्श्वरुक्कफवातजित्।
शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्तिता।।63।।
(भा. प्र. पुष्पवर्ग)

तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।
दीपनी कुष्ठकृच्छ्रास्त्रपार्श्वरुक्कफवातजित्।।7।।
(म.पा.नि.कर्पूरादिवर्ग)

## तुम्बुरुः (फलम्)

अपामार्गस्य बीजानि ....।
.... सर्षपांस्तुम्बुरूणि च ।।2।।
.... नागरं च दद्याच्छीर्षविरेचने ।।4।।
गौरवे शिरसः शूले पीनसेऽर्धावभेदके ।
क्रिमिव्याधावपस्मारे घ्राणनाशे प्रमोहके ।।5।।
(च. सू. 2)

गण्डीरो जलपिप्पल्यस्तुम्बुरुः श्रृङ्ग वेरिका ।
तीक्ष्णोष्णकटुरूक्षाणि कफवातहराणि च ।।168।।
कारव्यः कुञ्चिकाऽजाजी यवानी धान्यतुम्बुरु ।
रोचनं दीपनं वातकफदौर्गन्ध्यनाशनम् ।।302।।
(च. सू. 27)

चन्दनः .... निम्बतुम्बरु ... इति तिक्तस्कन्धः।।150।।
(च. वि. 8)

तुम्बुरुः कटुतीक्ष्णोष्णः कफमारुतशूलजित् ।
अपतन्त्रोदराध्मानकृमिघ्नो वह्निदीपनः ।।43।।
(ध. नि शतपुष्पादिवर्ग)

तुम्बुरु श्लेष्मशूलघ्नं गंधाढ्यमनिलापहम् ।।248।।
(शो. नि. शतपुष्पादिवर्ग)

तुम्बुरुः कटुस्तिक्तो रूक्षोष्णो दीपनो लघुः ।।1374।।
तीक्ष्णो हृद्यः कटुः पाके विदाही रोचनो जयेत्।
कफवातापतन्त्राक्षिकर्णकोष्ठशिरोरुजः ।।1375।।
कुष्ठशूलवमि श्वासप्लीहकृच्छ्रोदरकृमीन्।
(कै. नि. ओषधिवर्ग)

तुम्बुरुर्मधुरस्तिक्तः कटूष्णः कफवातनुत् ।
शूलगुल्मोदराध्मानकृमिघ्नो वह्निदीपनः ॥67॥

(रा. नि. आम्रादिवर्ग)

तुम्बुरु प्रथितं तिक्तं कटुपाकेऽपि तत्कटु ।
रूक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च ॥114॥
वातश्लेष्माक्षिकर्णौष्ठशिरोरुग्गुरुताकृमीन् ।
कुष्ठशूलारुचिश्वासप्लीहकृच्छ्राणि नाशयेत् ॥115॥

(भा. प्र. नि. हरीतक्यादिवर्ग)

# उटिङ्गणम् (बीजम्)

कुमारी आसवे उटिङ्गण नाम्ना प्रयुक्तः।।23।।
(शार्ङ्गधर म. खं.10)

कामवृध्देस्तु बीजं स्यान्मधुरं बलवर्धनम्।
कामवृध्दिकरं रुच्यं बहुलेन्द्रियवृध्दिदम्।।52।।
(रा. नि. शताह्वादिवर्ग)

उटंगनस्य बीजं तु गुरु स्निग्धं सुपिच्छिलम्।
मधुरं तिक्तमुष्णं च वृष्यं मूत्रलमुच्यते ।।स्व.।।
(द्र. गु. वि., ।।, प्रो. प्रि. व्र. शर्मा)

# वाराही (कन्दः)

वराहकन्दः श्लेष्मघ्नः कटुको रसपाकतः ।
मेहकुष्ठकृमिहरो बल्यो वृष्यो रसायनः ।।309।।
(सु. सू. 46)

वाराह्याः कफहा कन्दः कटुको रसपाकतः ।
हिमकुष्ठकृमिहरो हृद्यो बल्यो रसायनः ।।93।।
(ध. नि. करवीरादिवर्ग)

शौकरो मधुरस्तिक्तः कटुको रसपाकतः ।।1698।।
शुक्रायुः स्वरवर्णाग्निबलपित्तविवर्धनः ।
कफकुष्ठमरुन्मेहकृमीन् हन्ति रसायनम् ।।1699।।
(कै. नि. ओषधिवर्ग)

वराहीतिक्तकटुका विषपित्तकफापहा ।
कुष्ठमेहकृमिहरा वृष्या बल्या रसायनी ।।137।।
(रा. नि. करवीरादिवर्ग)

वाराही तु रसे स्वाद्वी तिक्ता पाके पुनः कटुः।
शुक्रायुः स्वरवर्णाग्निबलपित्तविवर्ध्दिनी।
कफकुष्ठमरुन्मेहकृमिहृच्च रसायनी ।।179।।
(भा. प्र. नि गुडूच्यादिवर्ग)

# वर्षाभूः (मूलम्)

पिप्पली .... वर्षाभूचित्रक .... प्रभृतीनि ।
कटून्युष्णानि रुच्यानि वातश्लेष्महराणि च ॥ 221-222॥
(सु. सू. 46)

वर्षाभूः कफवातघ्नी हिता शोफोदरार्शसाम् ॥239॥
(सु. सू. 46)

पुनर्नवा भवेदुष्णा तिक्तारूक्षा कफापहा।
सशोफपाण्डूहृद्रोगकासोरःक्षतशूलनुत् ॥265॥
(ध. नि. गुडूच्यादिवर्ग)

कठिल्लकं हिमं तिक्तं विपाके कटुकं लघु ।
संग्राहि वातलं पित्तकफशोणितनाशनम् ॥756॥
(कै. नि., ओषधिवर्ग)

वर्षाभूवसुकौ श्लेष्मवह्निमान्द्यानिलापहौ ।
पाके (पाठा. शाके) रूक्षतरौ गुल्मप्लीहशूलापहारकौ ॥156॥
(रा. नि. मूलकादिवर्ग)

श्वेता पुनर्नवा सोष्णा तिक्ता कफविषापहा।
कासहृद्रोगशूलास्रपाण्डुशोफानिलार्तिनुत् ॥405॥
(रा. नि. गुडूच्यादिवर्ग)

पुनर्नवाऽरुणा तिक्ता कटुपाका हिमा लघुः ।
वातला ग्राहिणी श्लेष्मपित्तरक्तविनाशिनी ॥233॥
(भा. प्र. नि. गुडूच्यादिवर्ग)

विषखर्परसंज्ञस्य स्वरसो नस्ययोजितः ।
अपस्मारं समुत्सार्य कल्याणाय प्रकल्पते ।। **457**।।

(सिध्द.भेषज. 4)

# वासा (मूलम्)

वातव्याधौ-वृषमूलादितैलम् ।।170-171।।
(च. चि. 28)

रसायने-वासामूलतुलाक्वाथे तैलमावाप्य साधितम्।
हुत्वा सहस्रमश्नीयान्मेध्यमायुष्यमुच्यते ।।18।।
(सु. चि. 28)

आटरूषो हिमस्तिक्तः पित्तश्लेष्मास्रकासजित्।
क्षयहृच्छर्दिकुष्ठघ्नो ज्वरतृष्णाविनाशनः ।।24।।
(ध. नि. गुडूच्यादिवर्ग)

मूढगर्भे-आटरूषकमूलेन नाभिं योनिञ्च लेपयेत् ।
नाभिलेपः प्रसिध्दोऽयं मूढगर्भापकर्षणः ।।28।।
(गदनिग्रह 64)

सिंहास्या तुवरा तिक्ता हृद्या स्वर्या हिमा लघुः ।।13।।
वातला कफपित्तास्रश्वासकासहरा हरेत्।
ज्वरमेहारुचिच्छर्दिकुष्ठतृष्णाक्षतक्षयान् ।।14।।
(कै. नि. आषधिवर्ग)

वासा तिक्ता कटुः शीता कासघ्नी रक्तपित्तजित्।
कामलाकफवैकल्यज्वरश्वासक्षयापहा।।49।।
(रा. नि. शताह्वादिवर्ग)

वासको वातकृत्स्वर्यः कफपित्तास्रनाशनः ।।89।।
तिक्तस्तुवरको हृद्यो लघुशीतस्तृडर्त्तिहृत् ।
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः ।।90।।
(भा. प्र. नि. गुडूच्यादिवर्ग)

# विषमुष्टी (बीजम्)

सुरसा .... विषमुष्टिकश्चेति ॥
सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः ॥
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥18-19॥
(सु. सू. 36)

सुरसयुग .... विषमुष्टीभूस्तृणो भूतकेशी ॥30॥
सुरसादिर्गणः श्लेष्ममेदःकृमिनिषूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥31॥
(अ. हृ. सू. 15)

मदाखुविषहा तिक्तः कषायानुरसो रसे।
कफघ्नो कृमिहा मेदःपित्तघ्नो विषमुष्टिकः॥
(म. नि.)

कारस्करः कटूष्णश्च तिक्तः कुष्ठविनाशनः ।
वातमयास्रकण्डूतिकफामार्शोव्रणापहः ॥143॥
(रा. नि. प्रभद्रादिवर्ग)

कुपीलुः शीतलं तिक्तं वातलं मदकृल्लघु ।
परं व्यथाहरं ग्राहि कफपित्तास्रनाशनम्॥68॥
(भा. प्र. नि. आम्रादिफलवर्ग)

सर्वेषां वातभग्नानां पानतः परमौषधम् ।
जीरावली मयूराख्या बीजं सविषतिन्दुकम् ।।85।।
(सो. नि.1)

विषतिन्दुर्महातिक्तः कफवातविषापहः ।।394।।
(सो. नि.2)

कारस्करो मदकरः तुवरो ग्राहकः स्मृतः ।
कटुस्तिक्तो लघुश्चोष्णः कुष्ठरक्तविकारहा।।
कण्डूं कफं वातरोगं व्रणं चार्शोज्वरं जयेत्।
अस्य चामफलं ग्राही तुवरं वातकृल्लघु ।।
शीतलं च समुद्दिष्टं तत्पक्वं विशदं गुरु।
पाके च मधुरं प्रोक्तं कफं वातप्रमेहकम् ।।
पित्तरक्तविकारं च नाशयेदिति कीर्त्तितम् ।।
(नि. र.)

**ज्वरे, अग्निमान्द्ये, विसूचिकायां च पठ्यते।**
**(सिध्दमे. मणि. 4/101, 4/256, 4/277)**

**वातरक्ते पठ्यते ।।27।।**
**(वैद्यमनोरमा 12)**

# वृश्चिकाली ( पञ्चाङ्गम्)

अपस्मारे, उदरे, पाण्डुरोगे पठ्यते।
(चि. 10/34) (चि. 13/108), (चि. 16/119) (चरक)

केरले दुरालभा नाम्ना इदमेव द्रव्यं प्रयुज्यते -
दुरालभां वा मधुसंप्रयुक्तां
लिह्यात् कफच्छर्दिविनिग्रहार्थं ।।38।।
(च. चि. 20)

विदारिगन्धा .... वृश्चिकाल्यृषभी चेति ।।4।।
विदारिगन्धादिरयं गणः पित्तानिलापहः ।
शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ।।15।।
(सु. सू. 38)

......वृश्चिकाली ---- वातसंशमनो वर्गः ।।7।।
(सु. सू.9)

......वृश्चिकाली ---- समासेन तिक्तो वर्गः।।11।।
(सु. सू. 42)

अर्क ..... वृश्चिकाल्यलवणाः.......
अर्कादिको गणो ह्येष कफमेदोविषापहः ।।
कृमिकुष्ठप्रशमनो विशेषाद्व्रणशोधनः ।।16-17।।
(सु. सू. 38)

दुरालंभा स्वादुशीता तिक्ता दाहविनाशिनी ।
विषमज्वरतृड्च्छर्दिमेहमोहविनाशिनी ।।20।।
(ध. नि. गुडूच्यादिवर्ग)

वृश्चिकाली कटुस्तिक्ता सोष्णा हृद्वक्त्रशुध्दिकृत्।
रक्तपित्तहरा बल्या विबंधारोचकापहा ।।10।।

(रा. नि. प्रभद्रादिवर्ग)

दुरालभा कटुस्तिक्ता मधुरा रक्तशुध्दिकृत् ।
शीता चोष्णा विसर्पघ्नी विषमज्वरनाशिनी ।।
तृड्च्छर्दिमेहगुल्मघ्नी मोहरक्तरुजापहा ।
वातं पित्तं कफं कुष्ठं ज्वरं चैव विनाशयेत्।।

(नि. र.)

## यव (सं. व.)

रूक्षः शीतोगुरुः स्वादुर्बहुवातशकृद्यवः ।
स्थैर्यकृत्सकषायस्तु बल्यः श्लेष्मविकारनुत् ।।18।।
(च.सू.27)

हृत्पाण्डुग्रहणीदोषप्लीहानाहगलग्रहान् ।
कासं कफजमर्शांसि यावशूको (क्षार) व्यपोहति ।।300।।
(च. सू. 27)

यवः कषायो मधुरो हिमश्च कटुर्विपाके कफपित्तहारी ।
व्रणेषु पथ्यस्तिलवच्च नित्यं प्रबद्धमूत्रो बहुवातवर्चाः ।। 41।।
स्थैर्याग्निमेधास्वरवर्णकृच्च सपिच्छिलः स्थूलविलेखनश्च।
मेदोमरुत्तृड्हरणोऽतिरूक्षः प्रसादनः शोणितपित्तयोश्च।। 42।।
(सु. सू. 46)

रूक्षः शीतो गुरुः स्वादु सरो विड्वातकृद्यवः ।
वृष्यः स्थैर्यकरो मूत्रमेदः पित्तकफाञ्जयेत् ।।67।।
पीनसश्वासकासोरुस्तम्भकण्ठत्वगामयान् ।।68।।
(ध. नि. सुवर्णादिवर्ग)

यवः कषायो मधुरः शीतलो लेखनो मृदुः।
व्रणेषु तिलवत्पथ्यो रूक्षो मेधाऽग्निवर्धनः ।।28।।
कटुपाकोऽनभिष्यन्दी स्वर्यो बलकरो गुरुः ।
बहुवातमलो वर्णस्थैर्यकारी च पिच्छिलः ।।29।।
कण्ठत्वगामयश्लेष्मपित्तमेदः प्रणाशनः ।
पीनसश्वासकासोरुस्तम्भलोहिततृट्प्रणुत् ।।30।।
(भा. प्र. नि. धान्यवर्ग)